സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:ईशोपदेशः। *Marks :(4)*

Quest:

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

a) 1 क्रिस्तुभागवतस्य कर्ता क: ?

(व्यास: , पी सी देवस्या , कालिदास: , माघ: )

2 क्रिस्तुभागवते कति सर्गा: सन्ति ?

(विंशतिः , त्रिंशत् , एकत्रिंशत् , त्रयोत्रिंशत् )

3 पर्वतोपरि स्थित्वा कृता: उपदेशा: केन नाम्ना प्रसिद्ध: ?

(धर्मप्रभाषणं , गिरिप्रभाषणं , अहिंसाप्रभाषणं , सूक्तिप्रभाषणं )

4 क्रिस्तुभागवते कस्मिन् सर्गे शिष्यान् प्रति येशुदेवस्य उपदेश: वर्णिता: ?

(पञ्चदशे , षोडशे , सप्तदशे , अष्टादशे )

b) **कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

5 'नाकम्' इत्यस्य समानार्थकम् पदम् लिखत ।

(स्वर्ग: , भूमि: , सर्प: , पर्वत: )

6 दास्यति इत्यस्य लकार: क: ?

(लट् , लङ् , लिट् , लृट् )

7 बद्ध्वा इति पदं कस्मिन् अव्यये अन्तर्भवति ?

(ल्यबन्ते , क्त्वान्ते , तुमुन्नन्ते , शानचन्ते )

8 क्रिस्तुभागवते कस्य चरितं वर्णयति ?

(येशुदेवस्य , कृष्णस्य , युधिष्ठिरस्य, जोसफस्य )

Hint:

1 पी सी देवस्या

2 त्रयस्त्रिंशत्

3 गिरिप्रभाषणेन

4 सप्तदशे

B

5 स्वर्ग:

6 लृट्

7 क्त्वान्ते

8 येशुदेवस्य

Chapter Name:**ईशोपदेशः।** *Marks :(2)*

Quest:

**अधोदत्ताशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

**1)" रहसि कृतस्य दानस्य फलम् ईशः नूनं दास्यति "।**

क) भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा ।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।

ख) यूयं स्वधर्माचरणं परेषा-
मालोकनार्थं जनतासमक्षम् ।
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तङ्गकृपाप्रसादः ।।

**अधोदत्ताशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

**2) " परदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति " ।**

| | |
|---|---|
| क) यदा पुनस्त्वं भजनं करोषि | ख) भिक्षा त्वया दक्षिणहस्तदत्ता |
| तदा समो मा भव दाम्भिकैस्त्वम् । | मा ज्ञायतां वामकरेण ते सा । |
| परावलोकाय हि ये भजन्ति | दानस्य चैवं निभृतं कृतस्य |
| समाजगेहे च चतुष्पथे च ।। | पिता फलं दास्यति गुप्तदर्शी ।। |

Hint:

| | |
|---|---|
| 1 | 2 |
| क) भिक्षा त्वया दक्षिणहस्तदत्ता | क) यदा पुनस्त्वं भजनं करोषि |
| मा ज्ञायतां वामकरेण ते सा । | तदा समो मा भव दाम्भिकैस्त्वम् । |
| दानस्य चैवं निभृतं कृतस्य | परावलोकाय हि ये भजन्ति |
| पिता फलं दास्यति गुप्तदर्शी । | समाजगेहे च चतुष्पथे च ।। |

**Chapter Name:ईशोपदेशः।** *Marks :(2)*

**Quest:**

**अधोदत्तं श्लोकं पठित्वा समुचितमाशयं चित्वा लिखत ।**

1 भिक्षा त्वया दक्षिणहस्तदत्ता

मा ज्ञायतां वामकरेण ते सा ।

दानस्य चैवं निभृतं कृतस्य

पिता फलं दास्यति गुप्तदर्शी ।।

क) प्रदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति ।

ख) धर्माचरणम् आत्मनिवृत्यर्थम् एव भवेत् ।

ग) दक्षिणहस्तेन कृतं दानं वामहस्तः मा जानातु ।

2) यदा पुनस्त्वं भजनं करोषि

तदा समो मा भव दाम्भिकैस्त्वम् ।

परावलोकाय हि ये भजन्ति

समाजगेहे च चतुष्पथे च ।।

क) प्रदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति ।

ख) धर्माचरणम् आत्मनिवृत्यर्थम् एव भवेत् ।

ग) दक्षिणहस्तेन कृतं दानं वामहस्तः मा जानातु ।

3) यूयं स्वधर्माचरणं परेषा-

मालोकनार्थं जनतासमक्षम् ।

मा कार्ष्ट नाकस्थपितुर्न लभ्यो

यद्येवमुत्तुङ्गकृपाप्रसादः ।।

क) प्रदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति ।

ख) धर्माचरणम् आत्मनिवृत्यर्थम् एव भवेत् ।

ग) दक्षिणहस्तेन कृतं दानं वामहस्तः मा जानातु ।

**Hint:**

1) ग) दक्षिणहस्तेन कृतं दानं वामहस्तः मा जानातु ।

2) क ) प्रदर्शनार्थम् ईश्वरभजनं कुर्वन्तः कपटभक्ताः भवन्ति ।

3) ख) धर्माचरणम् आत्मनिवृत्यर्थम् एव भवेत् ।

**Chapter Name:ईशोपदेशः।** *Marks :(4)*

**Quest:**

**4) श्लोकं पठित्वा गद्यक्रमं पूरयत**

1 भिक्षा त्वया दक्षिणहस्तदत्ता

मा ज्ञायतां वामकरेण ते सा ।

दानस्य चैवं निभृतं कृतस्य

पिता फलं दास्यति गुप्तदर्शी ।।

त्वया ----- सा भिक्षा ते ----- मा ज्ञायताम् एवं निभृतं कृतस्य ---- च फलम् ----- पिता दास्यति ।

2 यदा पुनस्त्वं भजनं करोषि

तदा समो मा भव दाम्भिकैस्त्वम् ।

परावलोकाय हि ये भजन्ति

समाजगेहे च चतुष्पथे च ।।

पुन: यदा ----- तदा त्वम् ----- चतुष्पथे च ----- मा भव ।

3 यदा पुनः प्रार्थयसे तदा गृहं

प्रविश्य बद्ध्वा च कवाटमेककः ।

कुरु स्वतातं प्रति याचनां रहः

पिता फलं दास्यति गुप्तदर्शकः ।।

पुन: यदा ----- तदा ----- एकक: ----- रह: याचनां कुरु ----- फलं दास्यति ।

**Hint:**

आशयव्यक्तता -2

सूचनानाम् परिपूर्णता -1

भाषाशैली -1

**Chapter Name:ईशोपदेशः।** *Marks :(4)*

**Quest:**

**श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत ।**

1) यदा पुनः प्रार्थयसे तदा गृहं

प्रविश्य बद्ध्वा च कवाटमेककः ।

कुरु स्वतातं प्रति याचनां रहः

पिता फलं दास्यति गुप्तदर्शकः ।।

क) प्रार्थना कथं करणीया ?

ख) श्लोकात् ल्यबन्तमव्ययं चित्वा लिखत ।

ग) कः फलं दास्यति ?

घ) श्लोके द्वारम् इत्यर्थकं पदं चित्वा लिखत ।

2) भिक्षा त्वया दक्षिणहस्तदत्ता

मा ज्ञायतां वामकरेण ते सा ।

दानस्य चैवं निभृतं कृतस्य

पिता फलं दास्यति गुप्तदर्शी ।।

क) दानस्य पुण्यं क: दास्यति ?

ख) श्लोके क्रियापदम् किम् ?

ग) श्लोके **रहसि** इत्यर्थे प्रयुक्तम् पदं किम् ?

घ) अधोरेखाङ्कितपदस्य पदच्छेदं लिखत ।

Hint:

1) क) गृहं प्रविश्य कवाटं बद्ध्वा ।

ख) प्रविश्य ।

ग) गुप्तदर्शकः पिता ।

घ) कवाटम् ।

2) क) पिता ।

ख) दास्यति।

ग) निभृतम् ।

घ) च + एवम् ।

Chapter Name:ईशोपदेशः। *Marks :(4)*

Quest:

**सम्भाषणं पठित्वा येशुदेवस्य उपदेशमधिकृत्य टिप्पणीं लिखत ।**

**पठनाधिगमः - आशयं ज्ञात्वा लिखति।**

**प्रश्नमातृका - लघूपन्यासम्। अङ्कः - ४। समयः - १०।**

छात्रः - नमस्ते आचार्य !।

गुरुः - नमस्ते । किमर्थम् आगतवान् ?

छात्रः - येशुदेवस्य उपदेशविषयं ज्ञातुम् आगतवान् ।

तस्मिन् विषये ग्रन्थाः सन्ति वा ?

गुरुः - आम् । प्रोफ. पि सि देवस्यमहाशयेन विरचितं क्रिस्तुभागवतम् ।

छात्रः - तत्र प्रतिपाद्यविषयः कः ?

गुरुः - येशुदेवः मानवधर्मान् बोधयति ।

छात्रः - धर्मविषये तस्य उपदेशः कः ?

गुरुः - धर्माचरणम् आत्मनिर्वृत्यर्थम् एव । अन्यथा करोति चेत् ईशस्य कृपा न लभते ।

छात्रः - दानमधिकृत्य सः किं वदति ?

गुरुः - सर्वान् आहूय तेषां पुरतः दानम् न कर्त्तव्यम् ।

किमिति चेत् दक्षिणहस्तेन दत्तं दानं वामहस्तः न जानीयात् ।

छात्रः - ईश्वरभजनं प्रति तस्याभिप्रायः कः ?

गुरुः - प्रार्थना अन्येषां पुरतः , सभामन्दिरेषु , चतुष्पथेषु वा न करणीया ।

ईश्वरभजनम् एकाकी भूत्वा शान्तमनसा करणीयम् ।

छात्रः - आचार्य ! धन्योऽस्मि ।

**Hint:**

<u>**मातृका उत्तरम् ।**</u>

**क्रिस्तुभागवतम् ।**

प्रोफ. पि . सि . देवस्य महाशयेन योशुदेवमधिकृत्य विरचितं महाकाव्यं भवति क्रिस्तुभागवतम् । अस्मिन् महाकाव्ये ईशोपदेशः वर्तते । अस्मिन् उपदेशः गिरिप्रभाषणं इत्यपि उच्यते। अस्मिन् उपदेशे कथं दानः करणीयः कथं ईश्वरप्राथना करणीया इत्यादि विषयान् प्रति उपदेशान् ददाति । यदा दानं करोति तदा सर्वेषां पुरतः प्रशंसां प्रताक्ष्या घोषाणां पुरतः चतुष्पथे च न करणीयम्। दक्षिणदस्तेन दत्ता भिक्षा वामकरेण माज्ञायातम्। एवं रहसि दानं दादव्यम्। एवं यदा ईश्वरभजनं करोति तदा अन्येषां पुरतः , सभामन्दिरेषु , चतुष्पथेषु वा न करणीया । ईश्वरभजनम् एकाकी भूत्वा शान्तमनसा करणीयम् । एवं योशुदेवः शिष्यान् उपदिशति।

**मूल्यनिर्णयसूचकाः**

आशयव्यक्तता -2

सूचनानां परिपूर्णता -1

भाषाशैली -1

Chapter Name:**ईशोपदेशः।** *Marks :(4)*

Quest:

**सूचनानुसारं ईशोपदेशमधिकृत्य लघुटिप्पणीं लिखत ।**

धर्माचरणम् ---------अन्येषां पुरतः ------ ईश्वरकृपा -------- कपटभक्ताः

------ दक्षिणहस्तेन दानं ------गुप्तदर्शी -------- एकान्ते प्रार्थनासत्फलम् ।

Hint:

**मातृका उत्तरम् ।**

**क्रिस्तुभागवतम् ।**

प्रोफ. पि . सि . देवस्य महाशयेन योशुदेवमधिकृत्य विरचितं महाकाव्यं भवति क्रिस्तुभागवतम् । अस्मिन् महाकाव्ये धर्माचरणविषये उपदेशान् वर्तते । अस्मिन् उपदेशः ईशोपदेशः एवं गिरिप्रभाषणं इति नाम्तेना प्रसिद्धं भवति। अस्मिन् उपदेशे कथं दानः करणीयः कथं ईश्वरप्राथना करणीया इत्यादि विषयान् प्रति उपदेशान् ददाति । यदा दानं करोति तदा सर्वेषां पुरतः प्रशंसां प्रताक्ष्या घोषाणां पुरतः चतुष्पथे च न करणीयम्। दक्षिणदस्तेन दत्ता भिक्षा वामकरेण माज्ञायातम्। एवं रहसि कृतस्य दानस्य फलं ईश्वरः अवश्यं दास्यति। एवं यदा ईश्वरभजनं करोति तदा अन्येषां पुरतः , सभामन्दिरेषु , चतुष्पथेषु वा न करणीया । ईश्वरभजनम् एकाकी भूत्वा शान्तमनसा करणीयम् । एवं रहसिकृत प्रार्थनायाः फलं ईश्वरः दास्यति। एवं योशुदेवः शिष्यान् उपदिशति।

**<u>मूल्यनिर्णयसूचकाः</u>**

आशयव्यक्तता -2

सूचनानां परिपूर्णता -1

भाषाशैली -1

आशयव्यक्तता -2

सूचनानां परिपूर्णता -1

भाषाशैली -1

**Chapter Name:ईशोपदेशः।** *Marks :(4)*

**Quest:**

**यथोचितम् योजयत ।**

क) नाकः - वीथी

दाम्भिकः - इच्छन्तः

लिप्सवः - स्वर्गः

रथ्या - कपटभक्ताः

ख) गुप्तदर्शी - मुतुकुलं श्रीधरः

क्रिस्तुभागवतम् - येशुदेवः

नवभारतम् - रहस्यदर्शी

गिरिप्रभाषणम् - पि सि देवस्या

**Hint:**

क) स्वर्गः,

कपटभक्ताः

इच्छन्तः,

वीथी ।

ख) रहस्यदर्शी ,

पि सि देवस्या ,

मुतुकुलं श्रीधरः,

येशुदेवः ।

**Chapter Name:ईशोपदेशः।** *Marks :(4)*

**Quest:**

**उदाहरणानुसारं पदच्छेदं लिखत।**

1 **च + एवम् - चैवम्**

च + एतद् - -----

न + एव - -----

तेन + एव - -----

2 **पुनः + त्वम् - पुनस्त्वम्**

पुनः + तव - -----

बाल: + त्वम् - ----

क: + त्वम् - -----

3 **यदि + एवम् - यद्येवम्**

यदि + एतद् - -----

सद्य + एव - -----

अद्य + अपि - -----

यदि + अवोचत्- —---

**Hint:**

1 चैतद्

नैव

तेनैव

2 पुनस्तव

बालस्त्वम्

कस्त्वम्

3 यद्येतद्

सद्यैव

अद्यापि

यद्यवोचत्

**Chapter Name:ईशोपदेशः।** *Marks :(2)*

**Quest:**

**अधोदत्तां खण्डिकां पठित्वा सूक्तद्वयम् चित्वा लिखत ।**

जनतायाः जीवितचर्या धर्मपदेन प्रसिद्धा । धर्माचरणम् आत्मनिर्वृत्यर्थमेव भवेत् । धर्मो रक्षति रक्षितः इति वचनं प्रसिद्धम् भवति । चतुर्षु पुरुषार्थेषु मुख्यः भवति धर्मः । सत्यं वद धर्मं चर इति उपदेशः अपि धर्माचरणस्य प्राधान्यं निर्वक्ति।

**Hint:**

धर्मो रक्षति रक्षितः ।

सत्यं वद धर्मं चर।

**Chapter Name:ईशोपदेशः।** *Marks :(5)*

**Quest:**

**प्रादेशिकभाषया लिखत ।**

**1** डा. के जे येशुदासः भारतीयसङ्गीतविद्वत्सु अन्यतमः भवति। सः अनेकासु भारतीयभाषासु चलच्चित्रगीतानि अगायत्। अयं कर्णाटकसङ्गीतस्य मधुरकण्ठः गायकः । केरर राज्यस्य कोच्चिमण्डले अस्य जननम् अभवत् । प्रसिद्ध गाय कस्य चेम्बै वैद्यनाथ भागवतस्य शिष्योत्तमः भवत्ययम् ।

2) सामवेद: संगीतप्रधान: इति विख्यात:। वेदकालादारभ्य संगीतविषये परामर्शा: द्रष्टुं शक्यन्ते। संगीतं सागरोपमम् भवति । मुत्तुस्वामिदीक्षितर, श्यामशास्त्री अय्यङ्कार, त्यागराज:, स्वातितिरुनाल् आदय: संगीतज्ञा: अस्मिन् सागरे निमग्ना:। प्रभातकालस्य राग: इति प्रसिद्ध: भूपाल: सुन्दर राग: भवति ।

**Hint:**

आशयव्यक्तता -2

सर्गात्मकता - 1

भाषाशैली -1